**SAMPLE QUESTION PAPER**

**भारतीयदर्शनम् (Bharatiya Darshan) (247)**

**परीक्षासमयावधिः (Time) - होरात्रयम् (3 Hrs)** **पूर्णाङ्काः (Full Marks) – 100**

---

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 15, [C] भागे 6, [D] 6, [E] 4 इति आहत्य 51 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं - वस्तुनिष्ठ/बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् - वस्तुनिष्ठप्रश्नाः/ मेलनम्,रिक्तस्थानानि,सत्यम्-असत्यम् इत्यादि। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं 30 तः 50 शब्दानां परिधिमध्ये समाधेयाः।
7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

**[A] प्रश्नसङ्ख्या 1-20 बहुविकल्पप्रश्नाः सन्ति येषां कृते 20 अङ्काः आवंटिताः भवन्ति।**

**1x20=20**

**1.** अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ॰ "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति वेदलक्षणं कृतम् –

क) मनुना ख) याज्ञवल्क्येन ग) सायणेन घ) आपस्तम्बेन।

ब. शौनकशाखा कस्य वेदस्य?

क) ऋग्वेदः ख) सामवेदः ग) यजुर्वेदः घ) अथर्ववेदः

**2.** अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. वेदः केन विरचितः?

क) ऋषिभिः ख) ईश्वरेण ग) पण्डितैः घ) केनापि न रचितः

ब.पुरुषार्थानां विवेके परं प्रमाणं किम्?

क) वेदः ख) वेदभाष्यम् ग) चातुर्वर्ण्यम् घ) बुद्धिः

**3.** अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. सामवेदीयं कर्म कः करोति?

क) होता ख) उद्गाता ग) अध्वर्युः घ) ब्रह्मा

ब. व्याकरणं वेदस्य किमङ्गमिव भवति?

क) हस्तौ ख) पादौ ग) श्रोत्रम् घ) मुखम्

**4.** अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. प्राशस्त्यनिन्दान्यतरपरं वाक्यं किम्?

क) अर्थवादः ख) विधिः ग) नामधेयः घ) निषेधः

ब. साक्षाद् वेदमाश्रित्य किं दर्शनं प्रवृत्तम्?

क) सांख्यम् ख) योगः ग) मीमांसा घ) न्यायः

**5.** अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. के ईश्वरं न अङ्गीकुर्वन्ति?

क) सांख्याः ख) नैयायिकाः ग) मीमांसकाः घ) वेदान्तिनः

ब. प्रत्यभिज्ञादर्शनम् कीदृशं दर्शनम्?

क)अद्वैतदर्शनम् ख) द्वैतदर्शनम् ग) विशिष्टाद्वैतदर्शनम् घ) द्वैताद्वैतदर्शनम्

**6.** सत्यमेव जयते इति प्राप्यते – 1

(क) तैत्तिरीये (ख) ईशे (ग) कठोपनिषद् (घ) न अत्रत्ये कुत्रचित्

**7**. श्रीमद्भगवद्गीतायां प्रणेता महर्षिः- मास 1

(क) व्यासदेवः (ख) कपिल: (ग) पतंजलि (घ) वाल्मीकि

8. अथ दशानां उपनिषदानां मुख्यत्वं न स्वीक्रियते 1

(क)ईशोपनिषद् (ख) केनोपनिषद् (ग) कठोपनिषद् (घ) श्वेतश्वतरोपनिषद्

9. आर्यसत्यचतुष्टयं न गण्यते 1

दुःखं (ख) दुःखसमुदयः (ग) दुःखनिरोधः (घ) ध्यानम्

10. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. जैनदर्शनमते आत्मा स्वरूपतः कीदृशः?

क) साकारः ख) निराकारः ग) उभयभिन्नः घ) किमपि न

ब. पञ्चमहाव्रतम् केन दर्शनेन सम्बद्धम्?

क) सांख्यम् ख) योगः ग) आर्हतम् घ) बौद्धः

11. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. तत्त्वार्थसूत्रस्य रचयिता कः?

क) श्रीधरस्वामी ख) विज्ञानभिक्षुः ग) वाचस्पतिमिश्रः घ) उमास्वामी

ब. जैनदर्शने मार्गदर्शकाः आचार्याः किम् उच्यन्ते?

क) अवताराः ख) तीर्थङ्कराः ग) आचार्याः घ) स्वामिनः

12. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ.जैनदर्शनमते जीवस्य बन्धकारणम् किम्?

क) माया ख) कर्म ग) अज्ञानम् घ) दुःखम्

ब. जैनदर्शनानुसारेण जीवः कीदृशः?

क) परिणामी ख) अपरिणामी ग) शुद्धः घ) अचेतनः

13. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. सांख्यदर्शनमते कति प्रमाणानि?

क) द्वे ख) त्रीणि ग) चत्वारि घ) पञ्च

ब. सांख्यदर्शनस्य प्रवक्ता कः?

क)कणादः ख) गौतमः ग) कपिलः घ) पतञ्जलिः

14. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. सांख्यप्रचवनभाष्यं केन रचितम् –

क) विज्ञानभिक्षुणा ख) आसुरिणा ग) कपिलेन घ) व्यासेन

ब. लघुः प्रकाशकः कः –

क) सत्त्वगुणः ख) रजोगुणः ग) तमोगुणः घ) कोऽपि न

15.अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. कस्य गुणस्य स्वभावः आवरणम् –

क) सत्त्वम् ख) रजः ग) तमः

ब. सांख्यदर्शने अव्यक्तमिति पदेन कस्य अभिधानम्?

क) पुरुषस्य ख) प्रकृतेः ग) ईश्वरस्य घ) अहङ्कारस्य

16.सांख्यदर्शने तत्त्वेषु प्रकृतिविकृतयः कति? **1**

क) पञ्च ख) सप्त ग) षोडश घ) पञ्चविंशतिः

17. योगसूत्रे चित्तवृत्तयः कति? 1

क) पञ्च ख) चतस्रः ग) सप्त घ) दश

18.योगसूत्राणां कः रचयिता? 1

क) पतञ्जलिः ख) गौतमः ग) व्यासः घ) पाणिनिः

19. योगसूत्राणामुपरि भाष्यं केन रचितम्? 1

क) शङ्कराचार्यः ख) वात्स्यायनः ग) व्यासः घ) जैमिनिः

20. सांख्यमते पुरुषाः कति? 1

क) एकः ख) द्वौ ग) पञ्च घ) बहवः

**{B} प्रश्नसङ्ख्या 21-35 वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति, तदर्थं30 अङ्काः आवंटिताः भवन्ति।**

**2x15=30**

**21. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** 2

क. योगशास्त्रस्य समानतन्त्रं ........ दर्शनं अस्ति।

ख. योगदर्शने .......... तत्त्वानि स्वीक्रियन्ते।

ग. अहिंसासत्यास्तेय...........अपरिग्रहाः यमा:।

**22. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** 2

क. शौचसंतोष..........स्वाध्यायेश्वरप्रणिधानानि नियमा:।

ख. योगश्चित्तवृत्ति............।

ग. ......प्रणेता महर्षि पतंजलि।

23. **अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** 2

क. अद्वैतवेदान्ते आत्मज्ञानम् इत्यस्य अर्थः....................... ।)

ख. अज्ञानं ........गुणात्मकम् ।

ग. लोभः ...... गुणात् जायते।

24. **अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** 2

**क.** अद्वैतवेदान्तमते ......... त्रिषु अपि कालेषु न प्रतीयते।

ख. "न किञ्चिदवेदिषम्" इति परामर्शे ....... विषयः।

ग.अद्वैतवेदान्तमते मायायाः सत्ता........ ।

25. **अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** 2

क.विवरणमते ...... अविद्यायाः विषयो हि।

ख.तत्त्वज्ञानसाधनं नाम ...............शास्त्रम्।

ग.सुरेश्वराचार्यानुयायिभिः ............. वादः अङ्गीक्रियते।

26. **अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** 2

क..................जीवस्य परमं विश्रामस्थानम्।

ख............संक्षेपशारीरककारः।

ग. ...............सुषुप्तौ जीवस्य उपाधिः।

27. **अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु।** **2**

क.मायायाः ...........शक्तयः सन्ति।

ख."आत्मा वा अरे द्रष्टव्यः" इति प्राप्यते.................. उपनिषदे।

ग..................आरोप्यस्य निवृत्तिः भवति ।

28. **अधोलिखितेषु रिक्तस्थानेषु उत्तरं ददातु।** **2**

क.अद्वैतवेदान्तमते............. प्रपञ्च-ब्रह्मणः।

ख...................समष्टिकारणशरीरोपहितं चैतन्यम्।

29. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

क. व्यष्टिकारणशरीरोपहितं चैतन्यं प्राज्ञः भवति। (सत्यम्/असत्यम्)

ख. मोक्षस्य परम्परासाधनैः कर्मयोगादिभिः चित्तशुद्धिः न भवति (सत्यम्/असत्यम्)

30. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

क. "नित्यं विभुं सर्वगतं सुसूक्ष्मम्"- कठोपनिषदि।(सत्यम्/असत्यम्)

ख. 'अजो नित्यः शाश्वतः- कठोपनिषदि।(सत्यम्/असत्यम्)

31. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

क. अद्वैतवेदान्तदर्शने "ज्ञानेन एव मोक्षः भवति" (सत्यम्/असत्यम्)

ख. ब्रह्मविद्यया जायमाना अविद्यानिवृत्तिः परमानन्दप्राप्तिश्च मोक्षः इत्युच्यते। (सत्यम्/असत्यम्)

32. **अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु** 2

क. 'आकाशशरीरं ब्रह्म' (1) छान्दोग्योपनिषत्

ख. आकाशः ह वै नामरूपयोः निर्वहिता (2) तैत्तिरीयोपनिषत्

33. **अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु** 2

क. निर्विशेषाद्वैतम् (1) श्रीभाष्यम्

ख. विशिष्टाद्वैतम् (2) शारीरकभाष्यम्

(3) विज्ञानामृतम्

34. **अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु** 2

क. जैनदर्शनम् (1) आस्तिकदर्शनम्

ख. जैन दर्शनस्य आचार्या: (2) तीर्थङ्कराः

(3) नास्तिक दर्शनम्

**35. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु** 2

क. तैत्तिरीयः (1) आ प्रज्ञानं ब्रह्म

ख. ऋग्वेदः (2) सह नाववतु

(3) हिरण्मयेन पात्रेण

**{C} षट्-प्रश्नानां यथानिर्देशम् लघूनि उत्तराणि लिखत।** **2 X 6**

36 वेदान्ते प्रस्थानं नाम किम् ? कानि प्रस्थानानि? 2

अथवा

वेदान्ते कः जीव? कः ईश्वरः?

37. बौद्धेषु कति शाखाः? काश्च ताः?

2

अथवा

आर्यसत्यचतुष्टयं किम्?

38. वेदांते जीवः विभुः अणुः वा। जीवः नित्यः अनित्यः वा। 2

अथवा

प्राणाः कतिविधा? के च ते?

39. शून्यवादिनां मते शून्यस्य स्वरूमं किम्?
2

40. ईशोपनिषद् कस्मिन वेदे ग्राहयते? कति मन्त्राः उपलभ्यन्ते च? 2

41. कतिप्रमाणानि जैनदर्शनमते ? पुद्गलः कः?
2

**{D}. षट्-प्रश्नानाम् अनतिदीर्घोत्तरैः समाधत्त।**
**3 X 6=18**

42. उपनिषद् इति शब्दस्य व्युत्पत्तिगताः अर्था के?

3

43. अद्वैतवेदान्तानुसारेण मायास्वरूपं समासेन लिखत।
3

अथवा

अद्वैतवेदान्तानुसारेण जीवस्वरूपं समासेन लिखत।

44. अद्वैतवेदान्तानुसारेण मोक्षसाधनानि आलोच्यन्ताम्। 3

45. भागवतप्रसिद्धां नवविधाम् भक्तिं व्याख्यात। 3

46. कर्मयोगविषये लघुटिप्पणीं लिखत। 3

अथवा

ज्ञानयोगविषये लघुटिप्पणीं लिखत।

47. दमविषये लघुटिप्पणीं लिखत। 3

अथवा

शमविषये लघुटिप्पणीं लिखत।

**{E}. चत्वारः दीर्घोत्तरैः समाधेयाः।** **5 X**
**4=20**

48. स्मृतिप्रस्थानस्य समासेन परिचयः देयः। 5

49. अद्वैतवेदान्तानुसारेण ब्रह्मस्वरूपं प्रतिपादयत। 5

अथवा

शुद्धाद्वैतवेदान्तानुसारेण ब्रह्मस्वरूपं समासेन प्रतिपादयत।

50. विशिष्टाद्वैतदर्शनानुसारेण मोक्षोपायं विचारयत। 5

51. षड्विधतात्पर्यनिर्णायकलिङ्गानां परिचयः सोदाहरणं देयः। 5

अथवा

वेदान्तशास्त्रं किमर्थम् अध्येतव्यम्?

## Marking Scheme

भारतीयदर्शनम् (247)

**परीक्षासमयावधिः (Time) - होरात्रयम् (3 Hrs)पूर्णाङ्काः (Full Marks) - 100**

| S.N | Answer | Marks |
|---|---|---|
| 1. | अ. घ) आपस्तम्बेन।<br>ब. घ) अथर्ववेदः | 1 |
| 2. | अ. घ) केनापि न रचितः<br>ब. क) वेदः | 1 |
| 3. | अ. ख) उद्गाता<br>ब. घ) मुखम् | 1 |
| 4. | अ. क) अर्थवादः<br>ब. ग) मीमांसा | 1 |
| 5. | अ. क) सांख्याः<br>ब. क) अद्वैतदर्शनम् | 1 |
| 6. | (घ) न अत्रत्ये कुत्रचित् | 1 |

| | | |
|---|---|---|
| 7. | (क) व्यासदेवः | 1 |
| 8. | (घ) श्वेतश्वतरोपनिषद् | 1 |
| 9. | (घ) ध्यानम् | 1 |
| 10. | अ. ख) निराकारः<br>ब. ग) आर्हतम् | 1 |
| 11. | अ. घ) उमास्वामी<br>ब. ख) तीर्थङ्कराः | 1 |
| 12. | अ. ख) कर्म<br>ब. क) परिणामी | 1 |
| 13. | अ. ख) त्रीणि<br>ब. ग) कपिलः | 1 |
| 14. | अ. क) विज्ञानभिक्षुणा<br>ब. क) सत्त्वगुणः | 1 |
| 15. | अ. ग) तमः<br>ब. ख) प्रकृतेः | 1 |

| | | |
|---|---|---|
| 16. | ख) सप्त | 1 |
| 17. | क) पञ्च | 1 |
| 18. | क) पतञ्जलिः | 1 |
| 19. | ग) व्यासः | 1 |
| 20. | क) एकः | 1 |
| 21. | क. सांख्यम्<br>ख. षड्विंशतिः<br>ग. ब्रह्मचर्य | 2 |
| 22. | क. तपः<br>ख. निरोधः<br>ग. योगदर्शनस्य | 2 |
| 23. | क. अज्ञाननिवृत्तिः<br>ख. त्रि<br>ग. रजो | 2 |

| | | |
|---|---|---|
| 24. | क. असत्<br><br>ख. अज्ञानम्<br><br>ग. व्यावहारिकी | 2 |
| 25. | क. ब्रह्म<br><br>ख. दर्शन<br><br>ग. आभासवादः | 2 |
| 26. | क. सुषुप्त्यवस्था<br><br>ख. सर्वज्ञात्ममुनिः<br><br>ग. कारणशरीरम् | 2 |
| 27. | क. द्वे<br><br>ख. बृहदारण्यक<br><br>ग. अधिष्ठानज्ञानेन | 2 |
| 28. | क. विवर्तः<br><br>ख. ईश्वरः | 2 |
| 29. | क. सत्यम्<br><br>ख. असत्यम् | 2 |
| 30. | क. असत्यम् | 2 |

| | | |
|---|---|---|
| | ख. सत्यम् | |
| 31. | क. सत्यम्<br>ख. सत्यम् | 2 |
| 32. | क. (2) तैत्तिरीयोपनिषत्<br>ख. (1) छान्दोग्योपनिषत् | 2 |
| 33. | क. (2) शारीरकभाष्यम्<br>ख. (1) श्रीभाष्यम् | 2 |
| 34. | क. (3) नास्तिक दर्शनम्<br>ख. (2) तीर्थङ्कराः | 2 |
| 35. | क. (2) सह नाववतु<br>ख. (1) प्रज्ञानं ब्रह्म | 2 |
| 36. | प्रत्येकं दर्शनं कस्मिंश्चित् केषुचिद् वा प्रतिष्ठितं भवति। वेदान्तदर्शनमपि येषु प्रतिष्ठितं तानि प्रत्येकं प्रस्थानमिति शब्देन अभिधीयन्ते।<br>तानि च श्रुतिः, स्मृतिः, न्यायः चेति।<br>अथवा<br>स्वतन्त्रतादिगुणस्वरूपः ईश्वरः चैतन्यं बिम्बस्थानीयम् परतन्त्रतादिगुणैः विशिष्टः अविद्यायां चिदाभासः जीवः इति। | 2 |

| | | |
|---|---|---|
| **37.** | चतस्रः।<br>**1.** माध्यमिकाः, **2.** सौत्रान्तिकाः, **3.** वैभाषिकाः **4.** योगाचाराः च।<br>**अथवा**<br>**1.** दुःखं **2.** दुःखसमुदयः **3.** दुःखनिरोधः **4.** दुःखनिरोधगामिनी प्रतिपत्तिश्च। | **2** |
| **38.** | जीव: विभु<br>जीव: नित्य: | **2** |
| **39.** | सत् न, असत् न, सदसत् न, सदसद्भिन्नम् च न इति<br>चतुष्कोटिविनिर्मुक्तं हि शून्यम्। | **2** |
| **40.** | **ईशोपनिषद् शुक्ल्यजुर्वेदे वेदे ग्राहयते। अष्टादश: मन्त्राः उपलभ्यन्ते च।** | **2** |
| **41.** | **द्विप्रमाणानि जैनदर्शनमते** । अचेतनजडद्रव्यमेव पुद्गलः इति कथ्यते। | **2** |
| **42.** | उपनिषत् नाम ब्रह्मविद्या।<br>उपपूर्वकात् निपूर्वकात् सद्-धातोः क्विप्प्रत्यये उपनिषत् इति स्त्रीलिङ्गरूपं प्राप्यते।<br>विशरणं गतिः अवसादनं चेति अर्थत्रयं स्पष्टीकरणीयम्। | **3** |
| **43.** | माया ब्रह्मणः शक्तिविशेषा तत एव सम्भूता।<br>मायायाः नामान्तराणि- इयं माया अज्ञानम् अविद्या प्रकृतिः अक्षरम् अव्यक्तम् इत्यादिशब्दैः व्यवह्रियते।<br>माया न सत् नापि असत्। गुणत्रयाणां सत्त्वरजस्तमसां समूहो भवति माया। | **3** |

| | | |
|---|---|---|
| | **अथवा** | |
| **44.** | **श्रवण-मनन-निदिध्यासनानि।**<br><br>**साधनचतुष्टयम्।** | **3** |
| **45.** | श्रवणम् – विष्णोः सर्वव्यापिनः ईश्वरस्य नाम्नां माहात्म्यस्य च श्रवणम्।<br><br>कीर्तनम् – भगवतः गुणानां नाम्नां च सङ्कीर्तनम् अथवा गानम्।<br><br>स्मरणम् – भगवद्विषये एव सर्वदा स्मरणम्।<br><br>पादसेवनम् – भगवतः पादपद्मयोः सेवा।<br><br>अर्चनम् – भगवतः पूजनम्।<br><br>वन्दनम् – नमस्क्रिया।<br><br>दास्यम् – भगवतः दासरूपेण आचरणम्।<br><br>सख्यम् – भगवता सह सौहार्दम्।<br><br>आत्मनिवेदनम् – भगवति आत्मसमर्पणम्। | **3** |
| **46.** | कर्मयोगो नाम निष्कामं फलाभिसन्धिरहितं कर्म।<br><br>तच्चित्तशुद्धये भगत्प्राप्तये च।<br><br>कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।<br><br>मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि॥<br><br>**अथवा** | **3** |

| | | |
|---|---|---|
| **47.** | **आत्मविषयक-श्रवणमननादिषु यदा मनसः प्रवृत्तिः भवति तदा बाह्येन्द्रियाणि स्वविषयं प्रति धावन्ति चेत् अन्तःकरणस्य येन वृत्तिविशेषेण इन्द्रियाणां स्वविषयं प्रति धावनं निराक्रियते सः दमः।**<br><br>**अथवा**<br><br>**"शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यः मनसः निग्रहः" इति उक्तं वेदान्तसारे। वस्तुतः मनसः निग्रहः एव शमः।** | **3** |
| **48.** | **अध्यायानां नामानि।**<br>**निबद्धाः केचन विषयाः वक्तव्याः –**<br>**यथा -**<br>· **सृष्टिः**<br>· **योगाः**<br>· **स्थितप्रज्ञः इत्यादयः।** | **5** |

| | | |
|---|---|---|
| 49. | अद्वैतदर्शने यत् ब्रह्मस्वरूपं प्रतिपाद्यते तद्भवति सच्चिदानन्दस्वरूपम्।<br>तच्च निर्गुणं निष्क्रियं शान्तम् अवाङ्मनसगोचरम्।<br>सजातीय-विजातीय-स्वगतभेदशून्यं ब्रह्म।<br>अथवा<br>ब्रह्म सच्चिदानन्दस्वरूपम्। अत्र ब्रह्म सविशेषं निर्विशेषमिति द्वैविध्यं नाप्नोति।<br>एकमेव ब्रह्म अस्तिवाचिशब्देन सगुणरूपेण निरूप्यते किञ्च नास्तिवाचिशब्देन निर्गुणरूपेण निरूप्यते।<br>श्रीकृष्ण एव परब्रह्म पुरुषोत्तमः। अत्रापि ब्रह्मणः जगतः अभिन्ननिमित्तोपादानकारणत्वम् अङ्गीकृतम्। | 5 |
| 50. | बद्धस्य जीवस्य मोक्षार्थं प्रकृष्टोपकारकमेव मोक्षोपायः।<br>तद्विधा- सिद्धोपायः, साध्योपायः च।<br>भक्तिः- भगवत्प्रीतिरूपं ज्ञानमेव भक्तिः।<br>प्रपत्तिः- विशिष्टाद्वैतदर्शने प्रपत्तिः स्वतन्त्रतया मोक्षोपायत्वेन निरूप्यते। | 5 |
| 51. | संसारदुःखस्य मूलं कारणम् इदम् अज्ञानम् भवति आत्मस्वरूपविषयकम्। तत् कस्मात् ? आत्मस्वरूपस्य अद्वैतस्य विषये अस्माकं ज्ञानं नास्ति इति कारणात् खलु संसारदुःखं जातम्। तस्मात् आत्मस्वरूपविषयकात् अज्ञानात् एव संसारः जातः इति अवगम्यते। आत्मस्वरूपस्य ज्ञानेन तत् अज्ञानं निवर्तते। अतः संसारस्य निवृत्तिः आत्मस्वरूपस्य ज्ञानेन भवति। संसारनिवृत्तिः एव मोक्षः इति उच्यते। तस्मात् यः मोक्षम् इच्छति सः आत्मस्वरूपं जानीयात्। आत्मनः स्वरूपं यत् ब्रह्म तत् उपनिषत्सु एव तात्पर्यतः बोधितम् अस्ति। अत एव साधनचतुष्टयसम्पन्नः नरः उपनिषदां तात्पर्यम् अवगन्तुम् इच्छति। तस्य तात्पर्यस्य सुखेन अवगमनार्थम् एव उत्तरमीमांसाख्यं वेदान्तशास्त्रम् आचार्यैः प्रवर्तितम्। मीमांसया उपनिषदां | 5 |

| | | |
|---|---|---|
| | **तात्पर्यभूतम् ब्रह्म यदा साधकेन ज्ञायते तदा स मोक्षं लभते। तस्मात् मोक्षम् उद्दिश्य साधकैः उपनिषन्मीमांसारूपस्य वेदान्तशास्त्रस्य अध्ययनं कर्तव्यम्।** | |